श्री कमला कवचं

श्री कमला कवचं

ईश्वर उवाच |
अथ वक्ष्ये महेशानि कवचं सर्वकामदं |
यस्य विज्ञानमात्रेण भवेत्साक्षात्सदाशिवः || 1 ||

नार्चनं तस्य देवेशि मंत्रमात्रं जपेन्नरः |
स भवेत्पार्वतीपुत्रः सर्वशास्त्रेषु पारगः |
विद्यार्थिना सदा सेव्या विशेषे विष्णुवल्लभा || 2 ||

अस्याश्चतुरक्षरिविष्णुवनितारूपायाः कवचस्य श्रीभगवान् शिव ऋषिरनुष्टुप्छंदो, वाग्भवी देवता, वाग्भवं बीजं, लज्जा शक्तिः, रमा कीलकं, कामबीजात्मकं कवचं, मम सुपांडित्य कवित्व सर्वसिद्धिसमृद्धये जपे विनियोगः ||

अथ कवचं |
ऐंकारी मस्तके पातु वाग्भवी सर्वसिद्धिदा |
ह्रीं पातु चक्षुषोर्मध्ये चक्षुर्युग्मे च शांकरी || 1 ||

जिह्वायां मुखवृत्ते च कर्णयोर्गंडयोर्नसि |
ओष्ठाधरे दंतपंक्तौ तालुमूले हनौ पुनः || 2 ||

पातु मां विष्णुवनिता लक्ष्मीः श्रीवर्णरूपिणी |
कर्णयुग्मे भुजद्वंद्वे स्तनद्वंद्वे च पार्वती || 3 ||

हृदये मणिबंधे च ग्रीवायां पार्श्वयोः पुनः |
सर्वांगे पातु कामेशी महादेवी समुन्नतिः || 4 ||

व्युष्टिः पातु महामाया उत्कृष्टिः सर्वदाऽवतु |
संधिं पातु सदा देवी सर्वत्र शंभुवल्लभा || 5 ||

वाग्भवी सर्वदा पातु पातु मां हरिगेहिनी |
रमा पातु सदा देवी पातु माया स्वराट् स्वयं || 6 ||

सर्वांगे पातु मां लक्ष्मीर्विष्णुमाया सुरेश्वरी |
विजया पातु भवने जया पातु सदा मम || 7 ||

शिवदूती सदा पातु सुंदरी पातु सर्वदा |
भैरवी पातु सर्वत्र भैरुंडा सर्वदाऽवतु || 8 ||

त्वरिता पातु मां नित्यमुग्रतारा सदाऽवतु |
पातु मां कालिका नित्यं कालरात्रिः सदाऽवतु || 9 ||

नवदुर्गा सदा पातु कामाख्या सर्वदाऽवतु |
योगिन्यः सर्वदा पांतु मुद्राः पांतु सदा मम || 10 ||

मातरः पांतु देव्यश्च चक्रस्था योगिनीगणाः |
सर्वत्र सर्वकार्येषु सर्वकर्मसु सर्वदा || 11 ||

पातु मां देवदेवी च लक्ष्मीः सर्वसमृद्धिदा |
इति ते कथितं दिव्यं कवचं सर्वसिद्धये || 12 ||

यत्र तत्र न वक्तव्यं यदीच्छेदात्मनो हितं |
शठाय भक्तिहीनाय निंदकाय महेश्वरि || 13 ||

न्यूनांगे अतिरिक्तांगे दर्शयेन्न कदाचन |
न स्तवं दर्शयेद्दिव्यं संदर्श्य शिवहा भवेत् || 14 ||

कुलीनाय महोच्छ्राय दुर्गाभक्तिपराय च |
वैष्णवाय विशुद्धाय दद्यात्कवचमुत्तमं || 15 ||

निजशिष्याय शांताय धनिने ज्ञानिने तथा |
दद्यात्कवचमित्युक्तं सर्वतंत्रसमन्वितं || 16 ||

विलिख्य कवचं दिव्यं स्वयंभुकुसुमैः शुभैः |
स्वशुक्रैः परशुक्रैश्च नानागंधसमन्वितैः || 17 ||

गोरोचनाकुंकुमेन रक्तचंदनकेन वा |
सुतिथौ शुभयोगे वा श्रवणायां रवेर्दिने || 18 ||

अश्विन्यां कृत्तिकायां वा फल्गुन्यां वा मघासु च |
पूर्वभाद्रपदायोगे स्वात्यां मंगळवासरे || 19 ||

विलिखेत् प्रपठेत् स्तोत्रं शुभयोगे सुरालये |
आयुष्मत्प्रीतियोगे च ब्रह्मयोगे विशेषतः || 20 ||

इंद्रयोगे शुभयोगे शुक्रयोगे तथैव च |
कौलवे बालवे चैव वणिजे चैव सत्तमः || 21 ||

शून्यागारे श्मशाने वा विजने च विशेषतः |
कुमारीं पूजयित्वादौ यजेद्देवीं सनातनीं || 22 ||

मत्स्यमांसैः शाकसूपैः पूजयेत्परदेवतां |
घृताद्यैः सोपकरणैः पूपसूपैर्विशेषतः || 23 ||

ब्राह्मणान्भोजायित्वादौ प्रीणयेत्परमेश्वरीं |
बहुना किमिहोक्तेन कृते त्वेवं दिनत्रयं || 24 ||

तदाधरेन्महारक्षां शंकरेणाभिभाषितं |
मारणद्वेषणादीनि लभते नात्र संशयः || 25 ||

स भवेत्पार्वतीपुत्रः सर्वशास्त्रविशारदः |
गुरुर्देवो हरः साक्षात्पत्नी तस्य हरप्रिया || 26 ||

अभेदेन भजेद्यस्तु तस्य सिद्धिरदूरतः |
सर्वदेवमयीं देवीं सर्वमंत्रमयीं तथा || 27 ||

सुभक्त्या पूजयेद्यस्तु स भवेत्कमलाप्रियः |
रक्तपुष्पैस्तथा गंधैर्वस्त्रालंकरणैस्तथा || 28 ||

भक्त्या यः पूजयेद्देवीं लभते परमां गतिं |
नारी वा पुरुषो वापि यः पठेत्कवचं शुभं |
मंत्रसिद्धिः कार्यसिद्धिर्लभते नात्र संशयः || 29 ||

पठति य इह मर्त्यो नित्यमार्द्रांतरात्मा
जपफलमनुमेयं लप्स्यते यद्विधेयं |
स भवति पदमुच्चैः संपदां पादनम्रः
क्षितिपमुकुटलक्ष्मीर्लक्षणानां चिराय || 30 ||

इति श्रीविश्वसारतंत्रोक्तं चतुरक्षरी विष्णुवनिता कवचं नाम श्री कमला कवचं |